# mAlAvatyAH parameshvarastotram

# માલાવત્યાઃ પરમેશ્વર અથવા મહાપુરુષસ્તોત્રમ્

## Document Information

Text title : mAlAvatyAH parameshvara evam mahApuruSha stotram brahmavaivartapurANAntargatam

File name : mAlAvatIparameshvarastotraBVP.itx

Category : purana, stotra

Location : doc_z_misc_general

Transliterated by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran

Proofread by : Singanallur Ganesan, PSA Easwaran

Description-comments : brahmavaivartapurANa brahmakhaNDam adhyAya 18 shloka 9-34

Latest update : January 21, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# માલાવત્યાઃ પરમેશ્વર અથવા મહાપુરુષસ્તોત્રમ્

વન્દે તં પરમાત્માનં સર્વકારણકારણમ્ ।
વિના યેન શવાઃ સર્વે પ્રાણિનો જગતીતલે ॥ ૯॥ ૧
નિર્લિપ્તં સાક્ષિરૂપં ચ સર્વેષાં સર્વકર્મસુ ।
વિદ્યમાનમદૃષ્ટં ચ સર્વૈઃ સર્વત્ર સર્વદા ॥ ૧૦॥ ૨
યેન સૃષ્ટા ચ પ્રકૃતિઃ સર્વાધારા પરાત્પરા ।
બ્રહ્મવિષ્ણુશિવાદીનાં પ્રસૂર્યા ત્રિગુણાત્મિકા ॥ ૧૧॥ ૩
જગત્સ્રષ્ટા સ્વયં બ્રહ્મા નિયતો યસ્ય સેવયા ।
પાતા વિષ્ણુશ્ચ જગતાં સંહર્તા શંકરઃ સ્વયમ્ ॥ ૧૨॥ ૪
ધ્યાયન્તે યં સુરાઃ સર્વે મુનયો મનવસ્તથા ।
સિદ્ધાશ્ચ યોગિનઃ સન્તઃ સંતતં પ્રકૃતેઃ પરમ્ ॥ ૧૩॥ ૫
સાકારં ચ નિરાકારં પરં સ્વેચ્છામયં વિભુમ્ ।
વરં વરેણ્યં વરદં વરાર્હં વરકારણમ્ ॥ ૧૪॥ ૬
તપઃફલં તપોબીજં તપસાં ચ ફલપ્રદમ્ ।
સ્વયં તપઃસ્વરૂપં ચ સર્વરૂપં ચ સર્વતઃ ॥ ૧૫॥ ૭
સર્વાધારં સર્વબીજં કર્મ તત્કર્મણાં ફલમ્ ।
તેષાં ચ ફલદાતારં તદ્બીજં ક્ષયકારણમ્ ॥ ૧૬॥ ૮
સ્વયં તેજઃસ્વરૂપં ચ ભક્તાનુગ્રહવિગ્રહમ્ ।
સેવા ધ્યાનં ન ઘટતે ભક્તાનાં વિગ્રહં વિના ॥ ૧૭। ૯
તત્તેજો મણ્ડલાકારં સૂર્યકોટિસમપ્રભમ્ ।
અતીવ કમનીયં ચ રૂપં તત્ર મનોહરમ્ ॥ ૧૮॥ ૧૦
નવીનનીરદશ્યામં શરત્પઙ્કજલોચનમ્ ।
શરત્પાર્વણચન્દ્રાસ્યમીષદ્ધાસ્યસમન્વિતમ્ ॥ ૧૯॥ ૧૧
કોટિકન્દર્પલાવણ્યં લીલાધામમનોહરમ્ ।
ચન્દનોક્ષિતસર્વાઙ્ગં રત્નભૂષણભૂષિતમ્॥ ૨૦॥ ૧૨
દ્વિભુજં મુરલીહસ્તં પીતકૌશેયવાસસમ્ ।

કિશોરવયસં શાન્તં રાધાકાન્તમનન્તકમ્ ॥ ૨૧॥ ૧૩
ગોપાઙ્ગનાપરિવૃતં કુત્રચિન્નિર્જને વને ।
કુત્રચિદ્રાસમધ્યસ્થં રાધયા પરિષેવિતમ્ ॥ ૨૨॥ ૧૪
કુત્ચિદ્ગોપવેષં ચ વેષ્ટિતં ગોપબાલકૈઃ ।
શતશ‍ૃઙ્ગાચલોત્કૃષ્ટે રમ્યે વૃન્દાવને વને ॥ ૨૩॥ ૧૫
નિકરં કામધેનૂનાં રક્ષન્તં શિશુરૂપિણમ્ ।
ગોલોકે વિરજાતીરે પારિજાતવને વને ॥ ૨૪॥ ૧૬
વેણું ક્વણન્તં મધુરં ગોપીસંમોહકારણમ્ ।
નિરામયે ચ વૈકુણ્ઠે કુત્રચિચ્ચ ચતુર્ભુજમ્ ॥ ૨૫॥ ૧૭
લક્ષ્મીકાન્તં પાર્ષદૈશ્ચ સેવિતં ચ ચતુર્ભુજૈઃ ।
કુત્રચિત્સ્વાંશરૂપેણ જગતાં પાલનાય ચ ॥ ૨૬॥ ૧૮
શ્વેતદ્વીપે વિષ્ણુરૂપં પદ્મયા પરિષેવિતમ્ ।
કુત્રચિત્સ્વાંશકલયા બ્રહ્માણ્ડે બ્રહ્મરૂપિણમ્ ॥ ૨૭॥ ૧૯
શિવસ્વરૂપં શિવદં સ્વાંશેન શિવરૂપિણમ્ ।
સ્વાત્મનઃ ષોડશાંશેન સર્વાધારં પરાત્પરમ્ ॥ ૨૮॥ ૨૦
સ્વયં મહાવિરાડ્રૂપં વિશ્વૌઘો યસ્ય લોમસુ ।
લીલયા સ્વાંશકલયા જગતાં પાલનાય ચ ॥ ૨૯॥ ૨૧
નાનાવતારં બિભ્રન્તં બીજં તેષાં સનાતનમ્ ।
વસન્તં કુત્રચિત્સન્તં યોગિનાં હૃદયે સતામ્ ॥ ૩૦॥ ૨૨
પ્રાણરૂપં પ્રાણિનાં ચ પરમાત્માનમીશ્વરમ્ ।
તં ચ સ્તોતુમશક્તાઽહમબલા નિર્ગુણં વિભુમ્ ॥ ૩૧॥ ૨૩
નિર્લક્ષ્યં ચ નિરીહં ચ સારં વાઙ્મનસોઃ પરમ્ ।
યં સ્તોતુમક્ષમોઽનન્તઃ સહસ્રવદનેન ચ ॥ ૩૨॥ ૨૪
પઞ્ચવક્ત્રશ્ચતુર્વક્ત્રો ગજવક્ત્રઃ ષડાનનઃ ।
યં સ્તોતું ન ક્ષમા માયા મોહિતા યસ્ય માયયા ॥ ૩૩॥ ૨૫
યં સ્તોતું ન ક્ષમા શ્રીશ્ચ જડીભૂતા સરસ્વતી ।
વેદા ન શક્તા યં સ્તોતું કો વા વિદ્વાંશ્ચ વેદવિત્ ॥ ૩૪॥ ૨૬
કિં સ્તૌમિ તમનીહં ચ શોકાર્તા સ્ત્રી પરાત્પરમ્ ।
ઇત્યુક્ત્વા સા ચ ગન્ધર્વી વિરરામ રુરોદ ચ ॥ ૩૫॥ ૨૭

ઇતિ માલાવતિકૃતં મહાપુરુષસ્તોત્રમ્ ॥

શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે બ્રહ્મખણ્ડે અષ્ટાદશાધ્યાયાન્તર્ગતે

ગન્ધર્વજીવદાન મહાપુરુષસ્તોત્રપ્રણયનમ્ ॥

brahmavaivartapurANa brahmakhaNDaM adhyAya 18 shloka 9-35

Encoded and proofread by
Singanallur Ganesan singanallur at gmail.com
PSA Easwaran

*mAlAvatyAH parameshvarastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*